**फञ्जि(ञ्जी)** स्त्री भनृज–इन् पृषो० वा ङीप् । भार्ग्याम् (वामनहाटि) राजनि० ।

**फट** पुंस्त्री० स्फुट–विकाशे अच् पृषो० । १सर्पाणां फणायाम् अमरः स्त्रियां टाप् । सा च २दन्ते मेदि० ३कितवे पु० हेमच० ।

**फट्** अव्य० स्फुट–क्विप् पृषो० । १योगे तन्त्रोक्ते २अस्त्रनामके मन्त्रभेदे च । ३अनुकरणशब्दे तस्य नम आदिवद् द्रव्य· विशेषस्य त्यागार्थताऽपि । शान्तिकुम्भचालने, अर्घ्यपात्र· चालने, अर्घ्यजलेन पूजोपकरणाभ्युक्षणे, अन्तरीक्ष· गविघ्नोत्सारणाय विकिरक्षेपणे, गन्धपुष्पाभ्यां करशोधने, अघमर्षणे पापपुरुषताडने, कराङ्गन्यासे, नैवेद्यप्रोक्षणे, होमाग्नेः क्रव्यादांशत्यागे, होमाग्न्यावाहने, तदग्नि· प्रोक्षणादौ च इत्यादिषु कर्मसु अस्य प्रयोगः नाना· तन्त्रेषु दर्शितः । [ख्यातायां झिल्लिकायां शब्दच० ।

**फडिङ्गा** स्त्री फडिति इङ्गते इङ्ग-अच् । (फड़िङ)

**फण** अनायासेनोत्पत्तौ भ्वा०पर० सक० सेट् फणति अफा· णीत्-अफणीत् पफाण । फणा० फेणतुः पफणतुः ।

**फण** गतौ भ्वा०पर०सक० सेट् । फणति अफाणीत् अफणीत् मित् वा घटादि० । णिचि फाणयति फणयति फणादि० ।

**फण** पुंस्त्री० फण–अच् । दर्व्याकारे सङ्कोचविकाशवति सर्प· मस्तके अमरः ।

**फण(णा)कर** पु०फणः(णा) कर इव यस्य । सर्पे शब्दरत्ना० ।

**फणादि** न० “फणाञ्च सप्तानाम्” पा० किति लिटि सेटि थलि च परे एत्त्वाभ्यासलोपनिमित्ते धातुसप्तके तच्च धातुपाठे उक्तं यथा “फण राज भ्राज भ्राश भ्लाश स्यम स्वन” सि०कौ० भ्वादौ दृश्यः ।

**फण(णा)धर** पुंस्त्री० फणं(णां) धरति धृ–अच् । सर्पे शब्दरत्ना० । स्त्रियां जातित्वात् ङीष् । फण(णा)भृदा· दयोऽप्यत्र ।

**फणाभर** पुंस्त्री० फणां बिभर्त्ति भृ–अच् । सर्पे हारा० स्त्रियां जातित्वात् ङीष् । [युक्तः ।

**फणिकार** पु० देशभेदे स च देशः वृ०सं० १४अ० दक्षिणस्या-

**फणिकेसर** पु० फणिनामकः केसरः । नागकेसरे राजनि० ।

**फणिखेल** पुंस्त्री० फणिना खेलति खेल–अच् । (भारुइ) खगे त्रिका० स्त्रियां ङीष् ।

**फणिचक्र** न० फणाकारं चक्रम् । विवाहादौ शुभाशुभ· सूचकनाडीकूटज्ञापनार्थे चक्रभेदे उपयमशब्दे १२५४ पृ० दृश्यम् ।

**फणिजा** स्त्री फणीव जायते जन–ड । (फणिमनसा) वृक्षे नैघण्टुप्र० । [शतावर्य्याम् २महासमङ्गायाञ्च राजनि० ।

**फणिजिह्वा** स्त्री फणिजिह्वा आकारोऽस्त्यस्य अच् । १मह्रा

**फणिज्झक** पु० फणिनमुज्झति ण्वुल् पृषो० । १तुलसीभेदे २जम्बीरसामान्ये च अमरः ।

**फणितल्पग** पु० फणिरूपे तल्पे गच्छति तिष्ठति गम–ड । शेषशायिनि विष्णौ शब्दार्थकल्प० ।

**फणिन्** पु० फणा अस्त्यस्य इनि । दर्वीकरे सर्पभेदे अमरः । अहिशब्दे ५८१ पृ० तद्भेदाः दृश्याः । २सर्पिणीनामकौ· षधौ स्त्री राजनि० । ३शेषावतारे पतञ्जलिमुनौ पु० स च पाणिनीयभाष्यकारकः योगसूत्रकारकश्च तयोर्भेद ऐक्यं वा

**फणिप्रिय** पु० फणिनां प्राणप्रदत्वात् प्रियः । वायौ शब्दर० सर्पाणां वायुभक्षकत्वेन वायोस्तत्प्रियत्वम् ।

**फणिफेन** न०फणिनां फेन इव । (आफिङ)अहिफेने रत्नमा०

**फणिभुज्** पु० फणिनं भुङ्क्ते भुज–क्विप् । पन्नगाशने गरुडे

**फणिमुख** न०फणिन इव मुखमस्य । स्तेयसाधनोपयोगिनि क्षत्रिकाक्षेपणार्थे यन्त्रभेदे दशकुमा० ।

**फणिवल्ली** स्त्री फणिसदृशी दीर्घा, फणिलोकस्था वा वल्ली । नागवल्ल्याम् (पानलता) फणिलतादयोऽप्यत्र हेमच० ।

**फणिहन्त्री** स्त्री फणिनं हन्ति हन–तृच् ङीप् । गन्धना· कुल्याम् राजनि० । [दुरालभायां राजनि० ।

**फणिहृत्** स्त्री फणिनं हरति अपसारयति हृ–क्विप् । क्षु·

**फणीन्द्र** पु० ६त० । सर्पेश्वरे अनन्ते २वासुकौ च ।

**फणीश्वर** पु० ६त० । १अनन्ते २वासुकौ शब्दरत्ना० ।

**फणीश्वरचक्र** न० नक्षत्रभेदे शनिस्थित्या सप्तद्वीपस्य शुभा· शुभसूचके चक्रभेदे चक्रशब्दे २८२० दृश्यम् ।

**फण्ड** पु० फण-गतौ ड तस्य नेत्त्वम् । जठरे उणादिकोषः ।

**फत्कारिन्** पु० फदित्यव्यक्तं करोति कृ–णिनि । खगमात्रे शब्दच० ।

**फर** न० फल+अच् लस्य रः । फलके भरतः ।

**फरुवक** न० पूगपात्रे हारा० । [शफरी फर्फरायते” उद्भटः ।

**फर्फर** त्रि० स्फुर-अच् पृषो० । अत्यन्तचले “गण्डूषजलमात्रेण

**फर्फरीक** न० स्फुर–ईकन् “फर्फरीकादयश्च” उणा० नि० । १नवपल्लवे उज्ज्वल० । २चपेटे पु० ३मृदुत्वे न० मेदि० । ४पादुकायां स्त्री संक्षिप्तसारः ।

**फर्व** गतौ भ्वा०पर०सक० सेट् । फर्वति अफर्वीत् पफर्व । “प्रफर्व्यं च पीवरी” यजु० १२।७१ वेददी० “फर्वतिः पूर· णार्थः” ऋ० १०।१०६।२ भा० दृश्यम् ।